षोडशः पाठः १६

# सूक्तयः

## ( अव्ययानि )

१. **सत्यं वद धर्मं चर।**

**भावार्थः** त्वं सर्वदा अपि सत्यवचनानि एव वद। धर्मानुसारम् आचरणं कुरु ।

२. **वद वाक्यं शुभं सदा।**

**भावार्थः** त्वं सर्वदा एव शुभकरं प्रीतिकरं कर्णप्रियं च वाक्य वद ।

३. **नहि सत्यात् परं धनम्।**

**भावार्थः** सर्वश्रेष्ठं धनं सत्यम् एव अस्ति । अस्मिन् संसारे सत्यात् श्रेष्ठं धनं किमपि नास्ति।

४. **हितं मनोहारि च दुर्लभं वचः।**

**भावार्थः** यद्वचनं हितकरम् अस्ति कर्णप्रियं चापि अस्ति। तादृशं वचनं एकत्र न मिलति । अर्थात् यद्वचनं हितकरं भवति प्रायः तद्वचनं मनःप्रियं न भवति। अतः हितकरं वचनं सर्वदापि ग्राह्यम् अस्ति । तत्र मनोहरस्य अपेक्षा न करणीया।

५. **कीर्तिः यस्य सः जीवति।**

**भावार्थः** यः मनुष्यः उत्तमानि कार्याणि कृत्वा यशः अर्जितवान् तस्य एव जीवनं सार्थकम् अस्ति। यस्य यशः नास्ति तस्य जीवनं मृत्युसमः एव अस्ति अतः सत्कार्याणि कुर्वन्तः वयं यशः अर्जयेम।

६. **सङ्घे शक्तिः कलौ युगै।**

**भावार्थः** इदं युगं कलियुगम् अस्ति। अस्मिन् कलियुगे सङ्घटने एव शक्तिः भवति। सङ्घटिताः जनाः सर्वं कार्यं साधयन्ति, असङ्घटिताः न। अतः वयं सङ्घटिताः भवेम।

७. **सन्तोषः परमं सुखम्।**

**भावार्थः** सर्वोत्तमं सुखं सन्तोषः एव अस्ति। एतत् सुखं यस्य समीपे भवति सः सर्वदा सुखी भवति। अतः वयं सन्तुष्टाः भवाम।

८. **शरीरमाद्यं खलु धर्मसाधनम्।**

**भावार्थः** यदि वयं धर्मानुसारम् आचरणं कृत्वा पुण्यानि अर्जयितुम् इच्छामः तर्हि प्रथमं शरीरस्य रक्षणम् आवश्यकम्। शरीरेण विना वयं धर्माचरणेन पुण्यार्जनं कथं करिष्यामः।

९. **जलदुरुपयोगः महत्पापम्।**

**भावार्थः** जलस्य दुरुपयोगं कृत्वा तस्य नाशः, जीवनस्य एव नाशः अस्ति। अतः एतत् महत्पापम् एव अस्ति ।

१०. **अमृतमेव गवां क्षीरम्।**

**भावार्थः** गवां दुग्धम् अमृततुल्यं अस्ति यतोहि अन्येषां प्राणिनां दुग्धस्य अपेक्षया गोः दुग्धं बहुगुणयुक्तं स्वास्थ्यवर्धकं च भवति।

११. **उदारचरितानां तु वसुधैव कुटुम्बकम्।**

**भावार्थः** उदारचिन्तनशीलाः जनाः समस्तां पृथिवीं स्वकुटुम्बसमानाम् एव चिन्तयन्तीति ते अन्येषु भेदं न गणयन्ति।

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| वद | त्वं कथय | बोलो |
| चर | त्वम् आचरणं कुरु | आचरण करो |
| सत्यात् | सत्यभाषणात् | सत्य से |
| मनोहारि | रुचिकरम् | मन को प्रिय लगने वाला |
| कीर्तिः | यशः | यश |
| सङ्घे | सङ्घटने | संगठन में |
| कलौ युगे | अस्मिन् युगे | कलयुग में |
| परमम् | श्रेष्ठम् | श्रेष्ठ |
| आद्यम् | प्रथमम् | पहला |

| | | |
|---|---|---|
| गवाम् | धेनूनाम् | गायों का |
| क्षीरम् | दुग्धम् | दूध |
| वसुधैव | पृथ्वी एव | पृथ्वी ही |
| कुटुम्बकम् | परिवारः | परिवार |

## अभ्यासः

१. **निम्नलिखितशब्दानाम् उच्चारणं कुरुत –**

न हि सत्यात्, सङ्घे शक्तिः, शरीरमाद्यम्, जलदुरुपयोगः, उदारचरितानां, कुटुम्बकम्।

२. **अधोलिखितवाक्यानां सस्वरगानं कुरुत –**

(क) न हि सत्यात् परं धनम्,

(ख) शरीरमाद्यं खलु धर्मसाधनम्।

(ग) उदारचरितानां तु वसुधैव कुटुम्बकम्।

(घ) जलदुरुपयोगः महत्पापम्।

(ङ) सङ्घे शक्तिः कलौ युगे।

(च) अमृतमेव गवां क्षीरम्।

३. **एकेन शब्देन उत्तरत –**

(क) कीदृशं वाक्यं वद ?

(ख) परमं धनं किम् अस्ति?

(ग) संसारेऽस्मिन् कः जीवति ?

(घ) परमं सुखम् कः अस्ति?

(ङ) गवां क्षीरं कीदृशम् अस्ति ?

(च) कस्य दुरुपयोगः महत्पापम् अस्ति?

**४. अधोलिखितशब्दान् चित्वा रिक्तस्थानानि पूरयत –**

शुभम् , दुर्लभम् , परमम् , खलु, वसुधैव

(क) उदारचरितानां तु ........................... कुटुम्बकम्।

(ख) शरीरमाद्यं ............................. धर्मसाधनम्।

(ग) सन्तोषः .....................सुखम्।

(घ) हितं मनोहारि च ......................... वचः।

(ङ) वद वाक्यं ............... सदा।

**५. उपयुक्तकथनस्य पुरतः 'आम्' अनुपयुक्तस्य च पुरतः 'न' इति लेख्यम् –**

(क) वद वाक्यं शुभं सदा। [ ]

(ख) हितं मनोहारि च न दुर्लभं वचः। [ ]

(ग) सङ्घे शक्तिः कलौ युगे। [ ]

(घ) शरीरमाद्यं न खलु धर्मसाधनं। [ ]

(ङ) अमृतमेव गवां क्षीरम्। [ ]

**६. पर्यायवाचिशब्दान् लिखत –**

कीर्तिः ....................................

जलम् ....................................

वचः ....................................

शक्तिः ....................................

वसुधा ....................................

**७. अधोलिखितानां शब्दानां विलोमपदानि लिखत –**

(क) सत्यम् .....................

(ख) शुभम् .....................

(ग) कीर्तिः .....................

(घ) सुखम् .....................

(ङ) धर्मम् .....................

## योग्यता-विस्तारः

१. **एतान् अपि पठाम -**

(१) सत्यमेव जयते नानृतम्।

(२) आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।

(३) प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।

(४) यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।

(५) आचारहीनं न पुनन्ति वेदाः।

२. **चित्रं दृष्ट्वा जानीम -**



पुरतः युवकस्य **पुरतः** दूरदर्शनम् अस्ति।

पृष्ठतः युवकस्य **पृष्ठतः** आसन्दः अस्ति।

### अव्ययपदानि

यथा - **यथा** राजा **तथा** प्रजाः । (भावार्थः -राजा प्रजाः च समाना एव )

यथा लता गायति तथा अन्यः गायकः न गायति। (भावार्थः - लता उत्तमं गायति इत्यर्थः)

वृक्षतः फलं पतति। प्रश्नः - **कुतः** फलं पतति?

एतत् मम गृहं । अहम् **इतः** विद्यालयं गच्छामि

सः युद्धं न कृतवान् **यतोहि** सः दुर्बलः अस्ति।

शीघ्रम् वायुयानं **शीघ्रं** प्राप्नोति।

मन्दम् गजः **मन्दं** चलति।

उच्चैः सिंहः **उच्चैः** गर्जति।

**मा** चिन्तां कुरु

**वृथा** कालयापनं मास्तु।

पुष्पाणि **इतस्ततः** विकीर्णानि सन्ति।

युवकः भ्रमणार्थम् उद्यानं गच्छति। प्रश्नः - युवकः **किमर्थम्** उद्यानं गच्छति

?